२कुटिलकेशे च मेधातिथिः "जटिलञ्चानधीयानं दुर्बालं कितवं तथा" मनुव्याख्याने तथार्थद्वयस्य तेनोक्तत्वात् ।

**दुर्वीरण** न० दुष्टं वीरणम् प्रा०स० । दुष्टे वीरणे तृणभेदे "श्मश्रू रयौपपच्छ्याणि दुर्वीरणानि जायन्ते" शत०ब्रा० ११।४।१।६ "दुर्वीरणानि दुष्टवीरणानीवेति" लुप्तोपमा भा०

**दुर्बोध** त्रि० दुःखेन बुध्यते दुर्+बुध—कर्मणि खल् । बोद्धुमशक्ये दुःखेन ज्ञेये "अतिदुर्बोधगिरः शिरोमणेः" गदाधरः "निसर्गदुर्बोधमबोधविक्लवाः" किरा०

**दुर्ब्राह्मण** पु० दुष्टो ब्राह्मणः प्रा०स० । "यस्य वेदश्च वेदी च उत्सन्ना च त्रिपौरुषी । स वै दुर्ब्राह्मणो ज्ञेयः, इति धूर्त्तस्वामिनोक्ते निन्दितब्राह्मणभेदे तस्य आवश्यकवेदपाठविहितहोमयोस्त्रिपुरुषमुत्सन्नत्वात् दुष्टत्वम् । "प्रष्टश्राद्दुर्ब्राह्मणस्य ब्रह्मवर्चसकामस्य" आपस्तम्बः "यो दुर्ब्राह्मणः सोमं पिपासति" तैत्ति०स०२।१।१०।१

**दुर्भग** त्रि० दुःस्थितो भगो भाग्यमस्य प्रा०ब० । दुष्टभाग्यान्विते "दुर्भगोऽयं जनस्तत्र किमर्थमनुशङ्कितः" हरिवं०१२६ अ० पतिस्नेहशून्यायां (दुया) ख्यातायां २स्त्रियां स्त्री "कर्मभिः स्वकृतैः सा तु दुर्भगा समपद्यत" भा०आ०१६८ अ० । प्रियादिषु पाठात् एतस्मिन् परे पूर्वस्थितस्त्रीलिङ्गशब्दस्य कर्मधारये न पुंवद्भावः ।

**दुर्भाग्य** न० दुष्टं भाग्यम् प्रा०स० । १दुरदृष्टे पापे । दुःस्थितं भाग्यमस्य प्रा०ब० । २दुष्टभाग्यान्विते त्रि०

**दुर्भिक्ष** अव्य० भिक्षायाः अभावः । १भिक्षाया अभावे । दुर्लभा भिक्षा यत्र प्रा०ब० । यद्देशे यानि शस्यानि जायन्ते तद्देशे तद्द्रव्यस्यानुत्पत्त्या २तद्द्रव्यालाभसमयभेदे न० तत्समयभेदसूचकाश्च प्रष्टिसंवत्सरान्तर्गता वर्षभेदाः ज्योति० त० भविष्यपु० उक्ताः संक्षेप्य दर्श्यन्ते यथा

"राष्ट्रभङ्गश्च दुर्भिक्षं तस्करैरुपपीडनम् । जानीयाद्विषमं घोरं प्रमाथिनि१२ वरानने ! । "दुर्भिक्षं जायते घोरं सर्वोपद्रवसंयुतम् । अनावृष्टिः समाख्याता व्यये२० संवत्सरे प्रिये !" । "क्वचिद्वर्षति पर्जन्यो देशे संक्षिन्नमण्डलः । दुर्भिक्षं सर्वरीवर्षे ३४ व्यवहारे विपर्ययः" । "दुर्भिक्षं जायते सर्वा मेदिनी दुष्यति प्रिये ! । प्लवे३५ प्लवन्ति तोयानि पीडिता मानवा भुवि" । "दुर्भिक्षं जायते घोरं धान्यौषधिप्रपीडनम् । अनले५० च समाख्याता नात्र कार्या विचारणा" । "देशभङ्गः सुदुर्भिक्षं समासात् कथयाम्यहम् । पिङ्गले५१ चारुपद्माक्षि ! दुर्भिक्षं नर्मदातटे" । "दुर्दिक्षं मध्यमं प्रोक्तं व्यवहारो न वर्तते । भवेद्द्वौ मध्यमा वृष्टिर्दुर्मतौ ५५ समुपस्थिते" । "दुर्भिक्षं मरणं घोरं धान्यौषधिप्रपीडनम् । पापरोगो भवेद्देवि ! रक्ताक्षे५८ऽमरवन्दिनि" ! । "रोगो मरणदुर्भिक्षं विरोधोपद्रवाकुलम् । क्रोधे५९ तु विषमं सर्वं समाख्यातं हरप्रिये !" । ५९ "मेदिनी चलते देवि ! सर्वभूतं चराचरम् । देशभङ्गश्च दुर्भिक्षं क्षये संक्षीयते प्रजाः । सौराष्ट्रे मालवे देशे दक्षिणे कोङ्कणे तथा । दुर्भिक्षं जायते घोरं क्षये६० संवत्सरे प्रिये !" । क्वचिदद्भुतोत्पातेऽपि दुर्भिक्षं भवति यथा

"मांसास्थिनी समादाय श्मशानाद् गृध्रवायसाः । श्वा शृगालोऽथ वा मध्ये पुरस्य प्रविशन्ति चेत् । विकिरन्ति गृहादौ च श्मशानं सा मही भवेत् । चौरैश्च हन्यते लोकः परचक्रसमागमः । संग्रामश्च महाघोरो दुर्भिक्षं मरकस्तथा । अद्भुतानि प्रसूयन्ते तत्र देशस्य विद्रवः । अकाले फलपुष्पाणि देशविद्रवकारणम्" इति ज्योत०त० । तत्र कालेऽशौचिभ्यो भिक्षाग्रहणे दोषाभाव इति हारलताप्रभृतयः । कौर्मे "सद्यःशौचं समाख्यातं दुर्भिक्षे चाप्युपप्लवे । डिम्बाहवे हतानाञ्च विद्युता पार्थिवैर्द्विजैः । सद्यः शौचं समाख्यातं शापादिमरणे तथा" इति शु०त० "दुर्भिक्षयुक्तराष्ट्रे च सूतके सूतकेऽपि वा । नियमाश्च न दुष्यन्ति दानधर्मरतेष्वपि । दीक्षिताश्चाभिषिक्ताश्च व्रततीर्थपरास्तथा । दीक्षाकाले विवाहादौ देवद्रोण्यां निमन्त्रिते । पूर्वसङ्कल्पिते चापि नाशौचं सूतसूतके" इति गारुडे २२६ अ० "शकटः शाकिनी गावो जालमास्कन्दनं वनम् । अनूपः पर्वतो राजा दुर्भिक्षे नव वृत्तयः" चाणक्यः "द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ । दाताऽन्नस्य तु दुर्भिक्षे सुभिक्षे वस्त्रहेमदः" । "एकग्रामे चतुःशाले दुर्भिक्षे राष्ट्रविप्लवे । पतिना नीयमानायाः पुरःशुक्रो न दुष्यति", ज्यो० त० ।

**दुर्भिद** त्रि० दुःखेन भिद्यते दुर्+भिद—कर्मणि वज्रर्थे क । दुर्भेद्ये भेत्तुमशक्ये । "गिरिमासाद्य दुर्भिदम्" भा०द्रो० ३५ अ० । खल् । दुर्भेद तत्रार्थे त्रि० ण्यत् । दुर्भेद्य तत्रार्थे त्रि० ।

**दुर्भिषज्य** त्रि० दुर्+भिषज्—कण्ड्वा० यक् कर्मणि ण्यत् यलोपः । १दुःखेन चिकित्स्ये । भावे ण्यत् । दुःखेन २चिकित्सायाम् "दुर्भिषज्यं चास्मै भवति यमेष न प्रतिपद्यते" इ०उ० "तस्मिन्द्रियद्वारदेशं यस्माद्दैशाच्छुक्रमादाय